# Vividha Devata Stuti

# विविध देवतास्तुतिः

## Document Information

Text title : Vividha Devata Stuti

File name : vividhadevatAstutiH.itx

Category : deities_misc, stuti

Location : doc_deities_misc

Proofread by : Paresh Panditrao

Description/comments : Ganga Mahatmya And Stuti Ratnavali By Swami Umeshvaranand Tirth

Latest update : July 8, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 8, 2023

*sanskritdocuments.org*

# विविध देवतास्तुतिः

ॐ परमात्मने नमः । श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।
गुरवे नमः । गोविन्दाय नमः । व्यासाय नमः । नरनारायणाभ्यान्नमः ।
नमः शिवाय । विष्णवे नमः । नमो भगवते वासुदेवाय ।
दुर्गायै नमः । ब्रह्मणे नमः ॥

परमात्मनः स्तुतिः ।

यत्पादतोयं भवरोगवैद्यो
यत्पादपांशुर्विमलत्व सिद्ध्यै ।
यन्नाम दुष्कर्मनिवारणाय
त्वमप्रमेयं पुरुषं नमामि ॥ १॥

श्रीगणेशस्तुतिः ।

शैलेन्द्रजादेहभवं सुमङ्गलं
बुद्धिप्रदंशोक विनाशदक्षम् ।
सिद्धिप्रदं ज्ञानप्रदं गजाननं
नमामितविघ्नहरं गणाधिपम् ॥ २॥

सरस्वतीस्तुतिः ।

ज्ञानामृताब्धिरस सारमयीं सुनेत्रीं
शुक्लाम्बरां कनकभूषणभूषिताङ्गीम् ।
वीणाञ्च पुस्तकधरांस्फटिकारव्यमालां
वाणीं नमामि अभयां सुमुखीं पराम्वाम् ॥ ३॥

गोविन्दस्तुतिः ।

गोपालबालकैर्नित्यं क्रीडन्तंयमुना तटे ।
गोविन्दं सच्चिदानन्दं नमामिसततंहरिम् ॥ ४॥

व्यासस्तुतिः ।

एकवेदस्यचत्त्वार शाखाकृत्त्वासविस्तरम् ।

इतिहासपुराणानां व्याख्यातारन्नमोऽस्तुते ॥ ५॥

शिवस्तुतिः ।

मृडंर्घूजटिं सर्वदुःखाप हारिं
शिवं शङ्करं शूलपाणिंवरेण्यम् ।
जगत्पूजनीयं प्रसन्नञ्च शान्तं
नमोऽस्तुमहेशं सुमुक्तिप्रदन्तम् ॥ ६॥

विष्णुस्तुतिः ।

यस्य स्मरणमात्रेण यज्ञदानादिका क्रिया ।
सद्यःसम्पूर्णतां यान्ति तंविष्णुं प्रणमाम्यहम् ॥ ७॥

वासुदेवस्तुतिः ।

श्रीवासुदेवं वसुदेवपुत्रं
श्रीदेवकीनन्दनकृष्णचन्द्रम् ।
श्रीरच्युतं वंशीधरं वरेण्यं
नमामितुभ्यंसुखदंसुशान्तम् ॥ ८॥

दुर्गास्तुतिः ।

सुशान्तिदात्रीं जननीष्टदात्रीं
सनातनी त्वां सुजनैर्सपूज्याम् ।
अनन्तदुःखौघविनाशदक्षां
नमामिदुर्गाञ्जनदुःख हन्त्रीम् ॥ ९॥

सूर्यस्तुतिः ।

आदित्यमण्डलस्थन्तं शङ्खचक्रवरं प्रभुम् ।
किरीटिनं कुण्डलिनं हिरण्यवपुसम्भजे ॥ १०॥

राधास्तुतिः ।

सदाषोडशवार्षिक्यां श्रीकृष्णप्राणवल्लभाम् ।
वृषभानुसुतां राधां नमामिसकलार्थदाम् ॥ ११॥

श्रीकृष्णस्तुतिः ।

अनन्तसौन्दर्यमनन्तधामं
अनन्त आनन्द अनन्त नामम् ।
अनन्त गोपीजन सेविताङ्गं
नमामिकृष्णं पुरुषोत्तमोत्तमम् ॥ १२॥

लक्ष्मीस्तुतिः ।

स्वराज्य साम्राज्य विभूतिदायिनीं
अनन्त आनन्द सुधा प्रदायिनीम् ।
सौभाग्य लक्ष्मीं भुवनैकपालिनीं
नमामि नित्यं सुखदां सुशान्तिदाम् ॥ १३॥

जगत्गुरुस्तुतिः ।

जगद्गुरुं जगद्वन्द्यं जगत् पूज्यं सनातनम् ।
गोविन्दपाद शिष्यं तं शङ्करं प्रणतोऽस्म्यहम् ॥ १४॥

गुरुवन्दना ।

ब्रह्माविष्णु महेशाख्यं शिष्याज्ञान विनाशकम् ।
मनोवाञ्छितदातारन्तं गुरुं प्रणतोस्म्यहम् ॥ १५॥

गङ्गास्तुतिः ।

विष्णुपादोद्भवां दिव्यां त्रिलोक पावनीं शिवाम् ।
नमामि जाह्नवीं गङ्गा भुक्तिमुक्ति प्रदायिनीम् ॥ १६॥

नारायणस्तुतिः ।

आपनार इति प्रोक्तः तत् तस्य अयनं शुभम् ।
नारायणाख्यं तं विष्णुं प्रणमामि निरन्तरम् ॥ १७॥

इति श्री स्वामी उमेश्वरानन्दतीर्थविरचिता विविध देवतास्तुतिः समाप्ता ।

Proofread by Paresh Panditrao

*Vividha Devata Stuti*

pdf was typeset on July 8, 2023

Please send corrections to *sanskrit@cheerful.com*